अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS-304**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**

**एम.ए. संस्कृतम्, (सत्रम् : तृतीयसत्रम)**
**काव्यशास्त्र**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. मम्मटाभिमतकाव्यप्रयोजनानि समीक्ष्य तदभिमतकाव्यहेतुप्रतिपादनं क्रियताम्।
2. काव्यप्रकाशोल्लिखितलक्षणालक्षणं लिखित्वा "लक्षणा तेन षडविद्या" इत्युक्तदिशा षडविधानां लक्षणानां सोदाहरणं निरूपणं करणीयम्।
3. काव्यशास्त्राचार्येषु मम्मटाचार्यस्य योगदानं प्रतिपादनीयम्।
4. अधोलिखितेषु केषाञ्चित्त्रयाणामुपरि परिचयात्मिका लघुटिप्पण्यो लेखनीयाः –
   (क) भरतः (ख) दण्डी (ग) वामनः (घ) अभिनवगुप्तः (ङ) महिमभट्टः (च) विश्वनाथः ।
5. कयोश्चिदद्वयोर्व्याख्या कार्या –
   (क) तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि।
   (ख) इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिबधैः कथितः।
   (ग) व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।
   (घ) साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. ध्वन्यालोकस्य प्रथमाद्योतस्य प्रतिपाद्यविषयः सम्यक विवेचनीयः।
2. ध्वन्यालोकस्य प्रथमाद्योतानुसारेण ध्वनिविरोधिमतमतान्तराणां विवेचन करणीयम्।
3. आनन्दवर्धनस्य कृतित्वं सम्यक् विवेचनीयम्।
4. यमक-अलंकारस्य लक्षणं सोदाहरण प्रतिपाद्यताम्।
5. रससम्प्रदायस्य परिचयो दीयताम्।
6. करुणविप्रलम्भश्रृङ्गारयोः को भेदः?

## खण्डः ग

## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. ध्वन्यालोके कति उद्योताः सन्ति ?
   (अ) चत्वारः (ब) षष्ठ
   (स) एकादश (द) पञ्च
2. मम्मटानुसारेण काव्यं कतिविधं भवति ?
   (अ) द्विविधं (ब) पञ्चविधम्
   (स) त्रिविधम् (द) नवविधम्
3. एतेषु को ध्वनिसम्प्रदायस्य आचार्यो नास्ति ?
   (अ) अभिनवगुप्तः (ब) मम्मटभट्टः
   (स) पण्डितराजजगन्नाथः (द) विश्वनाथः
4. "वाक्यं रसात्मकं काव्यम्" इति कस्य उक्तिः ?
   (अ) भामहस्य (ब) वामनस्य
   (स) विश्वनाथस्य (द) दण्डिनः
5. "वर्णसाम्यम्" कुत्र दृश्यते ?
   (अ) अनुप्रासे (ब) उपमायाम्
   (स) श्लेषेषु (द) रूपके
6. "अभिनवस्तु सम्बन्ध उपमापरिकल्पकः" इति लक्षणं कस्मिन अलङ्कार वर्तते ?
   (अ) श्लेषे (ब) रूपके
   (स) अर्थान्तरन्यासे (द) निदर्शनायाम्
7. "क्रियायाः प्रतिषेधेऽपि फलव्यक्तिः" कुत्र दृश्यते ?
   (अ) विभावनायां (ब) यमके
   (स) सन्देहे (द) समासोक्तौ
8. "उपमानोपमेयत्वे एकस्यैवेकवाक्यगे" कस्य अलंकारस्य लक्षणम् ?
   (अ) समासोक्तः (ब) काव्यलिंगस्य
   (स) उत्प्रेक्षायाः (द) अनन्वयस्य
9. "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" कस्य आचार्यस्य सूत्रम् ?
   (अ) भरतमुनेः (ब) मम्मटस्य
   (स) अभिनवगुप्तस्य (द) विश्वनाथस्य
10. "मिलितेष्वपि कारणेषु कार्यस्याकथनम्" कस्य अलंकारस्य संकेतं करोति ?
   (अ) अनुप्रासस्य (ब) विशेषोक्तः
   (स) सन्देहस्य (द) रूपकस्य

--------------x--------------